


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2020; 6(8): 53-54
www.allresearchjournal.com
Received: 12-06-2020
Accepted: 16-07-2020

**डॉ0 संजीत कुमार झा**
नरौचधाम, भाया–रतनपुर,
जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ0 संजीत कुमार झा**
नरौचधाम, भाया–रतनपुर,
जिला–दरभंगा, बिहार, भारत

# ज्योतिषशास्त्रोपनयनसंस्कारस्यध्ययनम्

## डॉ0 संजीत कुमार झा

**प्रस्तावनाः**

उपनयनसंस्कारः समस्तसंकारेषु अतिमहत्त्वपूर्णोऽभिमन्यते[1]। संस्कारोऽयं मुख्यः शैक्षिकसंस्कारो वर्तते। अनेन संस्कारेण जातकस्य सामाजिके जीवने पदापर्ण भवति। अतो जीवनेऽस्मिन् तस्य अभिनन्दनम् अनुशासनं चापि आवश्यकम्। सामाजिकं जीवनं बहुविधानि दायित्वानि अपेक्षते[2]। तद्यथा–

1. नागरिककर्तव्यानां क्रियात्मकं निर्वह्यम्।
2. सामुदायिक जीवनस्य संरक्षणम्।
3. संस्कृतेः संरक्षणम्।
4. सभ्यतायाः संरक्षणम्।

कश्चन योग्यः कुशलश्चैव इमानि दायित्वानि सम्यक् निर्वोढुमर्हति। अतो व्यक्तौ अभीष्टाया योगयताया उत्पादनं सुतराम् अपेक्ष्यते। अनया दृशाऽस्य संस्कारस्य उद्भवाः समुदायगतानां नागरिकीणाम् आवश्यकतानां पूर्तिमवधार्यैव अभवत्। पुरातनस्य भारतीयेतिहासस्य अनुशीलनेन ज्ञायते यत् व्यक्तेः प्राथमिकस्य जीवनस्य निखिला अपि क्रिया धार्मिकीभिः मावनाभिः अनुप्राणिता आसन्। अतो धार्मिकीम् अभिस्वीकृतिं विना किमपि सामुदायिकं कार्यजातं कथमपि नाभिमन्यते स्म। इत्थं कालान्तरे अस्मिन् कर्मणि धर्मस्य समावेशोऽभवत्। सुविदितमेव यत् सामाजिकं जीवनं सुष्ठु यापयितुं धर्मानुस्भूतानां विधिनिषेधानां पालनम् अनिवार्य भवति। लोके सांस्कृतिकी सामाजिकी च द्विविधा दीक्षा प्रसिद्धा वर्तत एव।

व्यक्तौ सामाजिकताया अभ्युदयाम शिक्षाया महत्त्वपूर्णं स्थानम् अवदानं च वर्तते। सांस्कृतिकतायां सामाजिकतायां च मिधो धनिष्ठः सम्बन्धो वर्तते। पुरा यो हि मानवः सांस्कृतिकदृष्ट्या सक्षम आसीत् स एव सामाजिक इत्यभिमन्यते स्म। उभयथा विकासमापन्नएव समाजे समग्रान् अधिकारान् विशिष्टाः सुविद्याश्च आदातुम अधिकृत आसीत्। उपनयनसंस्कारस्य माध्यमेन सांस्कृतिकदृष्ट्या सामाजिकदृष्ट्या च दीक्षितस्य मनुणस्य नूतनं जन्म जायते। अत उपनीतो द्विज इत्यभिधीयते।

मातुर्यदग्ने जायन्ते द्वितीयं मौञ्जिबन्धनात्।
ब्राह्मणक्षत्रियविशास्तस्मादेते द्विजाः स्मृताः[3]।।

उपनयनस्य कल्पना तदीयं महत्त्वं च तत्कालीने समाजे अभिमन्यमानं शिक्षाया महत्त्वं प्रकटयति। अवधारणेयं कियती गौरवयाग् यत् शिक्षया व्यक्ते अभिनवं जन्म स्वीक्रियते। उपनयनस्य इदमेव सर्वाधिकं महत्त्वं यदुपनीत एव द्विजत्वेन गण्यते। इदं कृत्यं सामाजिके जीवने प्रवेशस्य प्रधानात्र्भूतं वर्तते। यतोहि अनुपनीत आर्यकन्यां विवोदुम् अनर्हो भवति।

संस्काराणां मूलं परिशीलयामश्चेत् तेषां केन्द्रे मानवस्य मूलभूतेयं धारणा लक्ष्यते यत् स सांसारिक सम्पर्कत्वात् आत्मीयं सहजातं पावित्र्यं पुण्यं च मुञ्चति। ततृ पुनरवात्तुं तस्य द्विजन्मता अपेक्ष्यते।

अनुशीलनेन उपनयनं वैदिकंकर्म प्रसिद्धयति। ऋग्वेदे विद्याध्ययनमुद्दिश्य 'ब्रह्मचर्य' शब्दो द्विः प्रयुक्तो वर्तते–

ब्रह्मचारी चरति वेविषद्विषः सदेवानां भवत्येकमत्र्म्[4]।।
तत्रैव सद्य उपनीतस्य अध्येतुरुल्लेखोऽपि समुपलभ्यते–
युवा युवासाः परिवीत आगात् सउश्रेयान्भवति जायमानः।
तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसादेवयन्तः[5]।।

वैदिकयुगे छात्रो ब्रह्मचारी शिक्षकश्च आचार्यं इत्यभ्यधीयत। अथर्ववेदे उक्तं यदाचार्य उपनयन क्रियायाः कर्तृत्वेन ब्रह्मचारिणि नूतनं जन्म सृजति। अत एव ब्रह्मचारिणि उपनयनं तस्य द्वितीयं जन्म मन्यते–

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः[6]।।

अस्मिन्नेव सूक्ते मेखलाधारणम्, कृष्णमृगचर्मपरिधानम् अभिषेकः भिक्षाटनमित्येतेषां स्पष्टमुल्लेखा वर्तते[7]। तैत्तिरीयसंहितायाम् ऋषस्य वर्णनक्रमे 'ब्रह्मचारी' पुनश्च 'ब्रह्मचर्यम्' इत्युन्भयोः पदयोः उल्लेखो वर्तते–
''जायमानो ह वै ब्राह्मणस्त्रिभिऋणर्या जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः पितृभ्य एषवा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी[8]। अथर्ववेदस्य सम्पूर्णमेकं सूक्तं ब्रह्मचारिणो ब्रह्मचर्यस्य च प्रशंसापरं वर्तते। तेन ज्ञायने यत् जीवने ब्रह्मचर्यं महत्त्वपूर्णस्थानमभणत्।

ब्रह्मचारीष्णंश्चरतिरोदसी द्रभे तस्मिन्देवाः संमनसो भवन्ति।
स दाधार पृथिवीं द्विवञ्च स आचार्यं तपसा पिद्यत्ति[9]।।

ब्राह्मणकाले उपनयनं सविधि संस्कारत्वेन प्रतिष्ठामवाप। ब्रह्मचारी स्वत आचार्यमुपगम्य। प्रार्थयत् यत् स तस्य छात्रत्वमिच्छति। उपनिषत्काले ब्रह्मचर्यम् उत छात्रजीवनं सुप्रतिष्ठितं सारंधानिकं स्वरूपं प्राप्नोति। आचार्यं विना ब्रह्मविद्यायाः प्राप्तिर्न सम्भवा। ऋते जानान्न मुक्तिः, पुनश्च ऋते आचार्यान्न ब्रह्मविद्येति निश्चप्रचम्। छान्दोग्योपनिषदि प्रतिपादितम् ''आचार्यस्तुगतिर्वक्ता।'' अस्यामेव उपनिषदि ''उप त्वा अयानि'' इत्यनेन स्फुटं परिभाषितं यत् उपनयनं नाम आचार्यस्य समीपे उपगमनं ब्रह्मचर्य प्रवेशश्च। प्रवेशोऽयं न सुगमः प्रत्युत कांश्चन मानदण्डान् आदपात्। तैत्तिरीयोपनिषदि प्रवेशपात्रता स्फुटम् उपवर्णिता– ''एतद् गुह्यतरं नापुत्राय नाशिष्याय कीर्तमेदनन्यभक्ताय सर्वगुणसम्पन्नाय तद्यात्।''
उपनयन शब्दस्य अर्थः–
'उप' समीपेनयनमिति उपनयनम्। किन्तु कस्य समीपे नयनम् ? किमर्थं नयनम्? सम्भवतः आरम्भकाले 'आचार्यसमीपे शिक्षणार्थं नयनम्' अस्य तात्पर्यमासीत्। अथवा 'मेवशिष्यस्य विद्यार्थित्वस्य अवस्थां यावत् प्रापणम्' अस्य तात्पर्यं स्यात्। हिरण्यकोशिगृह्यसूत्रानुसारम्– ''अथैनमभिव्याहारयति। ब्रह्मचर्यमामुपमानयस्व ब्रह्मचारी भवानि देवेन सवित्रा प्रसूतः।'' अन्येषु गृह्यसूत्रेष्वपि एतादृश एवा भासो लक्ष्यते। काठकटीकाकारः आदित्यदर्शनः उपनय– उपनयन– मौञ्जीबन्धन – बटुकरण– व्रतबन्धादीन् शब्दान् समानार्थकान् मनुते।

'उपनयन' शब्दो द्वेधा बोधयितुं शक्यते भवव्युत्पत्त्या, करणव्युत्पत्त्या वेति।

**भावव्युत्पत्तिः–**
उप समीपे आचार्यादीनां वटोर्नयनं प्रापणमुपनयनम्।

**करणव्युत्पत्तिः–**
समीपे आचार्यादीनां नीयते बटुयैनतदुपनयन मिति। अर्थात् स संस्कारः कृत्यं वायेन बालकः आचार्यसमीपे नीयते।
तत्र धर्मशास्त्रे विभिन्नाः कामना आश्रित्य क्रियमाणस्य उपनयनस्य भिन्नभिन्नः कालोऽवलोक्यते। तथापि आपस्तम्ब– बौधायनाभ्यां नैवर्णिकाणां कृते उपनयनस्य अग्रलिखिताः सामाना काम्यकालाः[10] प्रतिपादिताः सन्ति–

**ब्रह्मवर्चसकामः–**
सप्तमेवर्षे मेधाकामः– त्रयोदशेवर्षे आयुष्कामः– अष्टमें वर्षे पुष्टिकाः – चतुर्दशे वर्षे तेजस्कामः – नवमे वर्षे भ्रातृव्यकामः– पञ्चदशे वर्षे अन्नाद्यकामः– दशमे वर्षे सर्वकामः– षोडशे वर्षे इन्द्रियकामः– एकादशे वर्षे – पशुकामः– द्वादशे वर्षे।

**वेदारम्भः–**
उपनयनात् परमृ अनुष्ठीयमानः संस्कारो वर्तते। वेदारम्भः। गौतमः संस्कारक्रमे चत्वारि वेदव्रतानि उल्लिखितवाम्–
1. महानाम्नी
2. महाव्रतम्
3. गपनिषद्
4. गोदानम्।

''प्रथमं स्यान्महानाम्नी द्वितीयंस्यान्महाव्रतम्।
तृतीयं स्यादुपनिषद् गोदानाख्यन्ततः परम्[11]।।

उक्तव्रतानि मूलतः सर्वेभ्यो द्विजेभ्योऽभिप्रतानि आसन्, यतस्तेषाम् अनुष्ठानं पायः विप्रपरिवारेष्वेव विधीयते स्म। कालक्रमेण विप्रेतरा वैदिकव्रतानुष्ठान् अत्यजन्। विप्रा अपि वैदिकोत्तरसाहित्यम् अध्येतुं प्रावर्तन्त। इत्थं वैदिकस्वाध्यायस्य सत्त्वात् वेदव्रतानामपि अनुपालनं बाधितमभूत।
बहुषु गृह्यसूत्रेषु च वेदव्रतानामुल्लेख न लभ्यते। स्मृतयो विशेषतया मौनमाचरन्ति अस्मिन् विषये। परम्, इदम् अपेक्षितमासीत् यत् वेदव्रतानां स्थानमत्रिकर्तुं कोऽपि संस्कारविशेषः प्रवर्त्येत। इत्थं वेदारम्भसंस्कारः प्रवृत्तिमगात् व्यासः आप्रथमं संस्कारमेनम् उदलिखत्[12]।
वेदाध्ययनं त्रैवर्णिकानां कर्तव्यं विहितम्। मनुः वेदानध्यायिनः कुतस्य शूद्रत्वं समुद्घोष यति। यथा–

योऽधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः[13]।।
याज्ञवल्क्यो वेदं द्विजान्तं परं निः श्रेयसकरं मनुते।
वेद एव द्विजातीनां निः श्रेयसकरः परः।
यं यं क्रतुमधीयीत तस्य तस्याजुयात् फलम्।
त्रिर्वित्तपूर्णं पृथिवीदानस्य फलमश्नुते।
पतसश्च परस्येय नित्यं स्वाध्यायवानृ द्विजः[14]।।

आरम्भे उपनयनेन सहैव वेदाध्ययनं प्रारभते स्म। बालकस्य गुरुमृहगमनमेव उपनयनम् इत्यभिधीयते। तत्रैव गायत्रीमन्त्रेण वैदिककस्वाध्यायस्य उपक्रमो जायते स्म। वस्तुतः वेदाध्ययनम् उपनयनस्य औमूतमेवासीत्। अत एव याज्ञवल्क्येन उपवर्णितम्–

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।
वेदमध्यापयेदैनं शौचाचारांश्च शिक्षयेत्।।

कालक्रमेण उपनयनात् प्रागेव वैदिकेत्तर साहित्यस्य अध्ययनं प्रारब्धम्, उपनयनं च देहसंस्कारमात्रम्, अयाशिष्यत। अतः उपनयनमतिरिच्य संस्कारान्तस्य अपेक्षाऽन्वभूयत्, येन स्वाध्याय आरभ्येत्।

**सन्दर्भ ग्रंथ सूची :**

1. संस्कारप्रकाशः पृ. 99
2. तत्रैव।
3. याज्ञवल्क्यस्मृति 1/39
4. तत्रैव।
5. ऋग्वेद 3/8/4
6. अथर्ववेद 11/5/3
7. अथर्ववेद 11/5/6–9
8. तैत्तिरीय संहिता 6/3/10/5
9. आपस्तम्बधर्मसूत्रम् 1/1/20–26
10. आपस्तम्बधर्मसूत्र 111/20–26
11. आश्वलायनः संस्कारमयूख पृ. 63
12. व्याासस्मृतिः 1/14
13. मनुस्मृतिः 2/168
14. याज्ञवल्क्यस्मृतिः 1/40, 47